# धात्वर्थे कौण्डभट्टमतपरिशीलनम्

दीपेन्द्रगौतमः

व्याकरणाचार्यः

इलाम-नेपालः

*minajaya2047@gmail.com*

Interpretation of Kaunda Bhatta's Word Root Meaning
- by Dipendra Gautam

The article deals with the interpretation of the meaning of Kaunda Bhatta's root word.

## लेखसारः

*धातोरर्थः कः ? इति विषये विदुषां महान् मतभेदो दृश्यते । पदवाक्यप्रमाणज्ञाः विशेषेणेह विवदन्ते गभीरम् । सर्वेऽपि स्वसिद्धान्तानुरूपं स्वाभिमतमगदन् । इह केचन फलं धात्वर्थो व्यापारः प्रत्ययार्थ इति ब्रुवन्ति चेत् फलमात्रं धात्वर्थ आख्यातार्थो भावना चान्ये । फलव्यापारौ धात्वर्थौ आख्यातार्थो भावना इति केषाञ्चनानां मतम् । व्यापारमात्रस्य धात्वर्थत्वं फलञ्च प्रत्ययार्थ इति चानेके । फलव्यापारयोर्धात्वर्थत्वे कृतिराख्यातार्थ इत्युद्घोषयन्ति पुनरिह केचन । परञ्च वैयाकरणनयस्तु कश्चिद् भिन्न एव । स्वग्रन्थे भूषणसारे कौण्डभट्ट अवादीत् यत् फलव्यापारौ धातुवाच्यौ भवतः । आख्यातार्थश्चकर्तृकर्मसंख्याकालाः चत्वारः । कर्ताकर्मणी फलव्यापारयोराश्रयत्वेन वर्तेते । व्यापाराश्रयः कर्ता, फलाश्रयं कर्म इति । शाब्दबोधोपक्रमे कर्तृकर्मणी फलव्यापारयो-राधाराधेयभावेन विशेषेणे भवतः । तत्राख्यातार्थकर्तुः चैत्रादिनाऽभेदेनान्वयः, फलञ्चानुकूलत्वसम्बन्धेन व्यापारे विशेषणम् । यद्यपि "प्रकृतिप्रत्ययार्थौ सहार्थं ब्रुतस्तयोः प्रत्ययार्थस्यैव प्राधान्यम्" इति नियमस्तथापि "भावप्रधानमाख्यातं सत्त्वप्रधानानि नामानि" इति निरुक्तोक्तेर्व्यापार-मुख्यविशेष्यक-श्शाब्दबोध इति । कौण्डभट्टो धात्वर्थविषये एकवृन्तगतफलन्यायेन फलनिरुपिता व्यापार-निरूपिता च खण्डशः शक्तिं स्वीकरोति । नागेशस्तु फलविशिष्टे व्यापारे, व्यापारविशिष्टे फले शक्तिं स्वीकरोति । शाब्दबोधश्च कर्तृप्रत्यये व्यापारमुख्यविशेष्यकः, कर्मप्रत्यये फलमुख्यविशेष्यको भवति ।*

***शब्दकुञ्जिका*** - शाब्दबोधः, आख्यातः, धात्वर्थः, विशिष्टः, विशेष्यकः, साध्या, सिद्धा ।

## विषयपरिचयः

"सर्वं च नामधातुजमाह, नामानि आख्यातजानीति व्याकरणे शकटस्य तोकम्" इत्याद्युक्तेः धातुरेवः सर्वशब्दमूलमिति निश्चीयते । धरति शब्दस्वरूपान् इतिविग्रहे "डुधाञ्" 'धारणपोषणयोः' इति धातोरौणादिकतुन्प्रत्यये कृते धातुरिति पदं निष्पद्यते । तस्य धारकः पोषको वेत्यर्थो भवति । समेषां शब्दानां मूलभूतस्य धातोः इदानीमप्येतन्नाम्नैव प्रसिद्धिर्विद्यते । सकलपदपोषकत्वादन्वर्थं नाम एतस्य। सामान्यरूपेण धातु इत्युक्ते सति धातोर्भेदाः, प्रकारा इति ज्ञायन्ते । सैद्धान्तिकरूपेण धातुपदवाच्यः कः ? धातोरर्थत्वेन किं वा गृह्यते ? इत्यत्र विवादो परिलक्ष्यते । विहाय नैयायिकमीमांसकादीनां मतमपि वैयाकरणेषु प्राच्यनव्येषु मतभेदो वर्तते । फलमेव धात्वर्थ उत व्यापारोऽपि ? द्वयोरेव धात्वर्थत्वे आख्यातवाच्यं किम् ? धात्वर्थ निश्चिते सति शाब्दबोधे मुख्यविशेष्यः कः ? सर्वमप्येतत् धात्वर्थसमीक्षणे आयन्ति ।

## समस्याकथनम्

अनुसन्धानकार्यं तदैव प्रारभ्यते यदा समस्याः समापन्नाः स्युः । समस्याया ज्ञानानन्तरमेव समाधानाय यत्नः करणीयो भवतीति शोधकार्ये समस्याज्ञानं प्रथममावश्यकम् भवति ।

क) धात्वर्थविषये मतमतान्तरं किम् ?

ख) कौण्डभट्टमतं किम् ?

ग) कौण्डभट्टमते नागेशविचारः कः ?

## उद्देश्यम्

सोद्देश्यो लेख एव समस्यासमाधानाय युक्तो भवति । अतः प्रस्तुतस्य शोधलेखस्य निम्नलिखितानि उद्देश्यानि सन्ति :

क) धात्वर्थविषये मतमतान्तरोपस्थापनम् ।

ख) वैयाकरणसिद्धान्तदृशा कौण्डभट्टमतेन तत्खण्डनम् ।

ग) कौण्डभट्टमते नागेशस्य विमतेर्विश्लेषणम् ।

## अनुसन्धानविधिः प्रक्रिया च

अनुसन्धानसम्पादयितुं बहवो विधयो भवन्ति । अतो बहुषु विधिषु विषयप्रकृत्यानुसारं कतमो विधिरूपयुक्तो भवेदिति सम्यग्विचार्य मुख्यत्वेनैको विधिरवलम्बनीयः । प्रस्तुतालेखे मुख्यत्वेन पुस्तकालयीयविधिमाश्रित्य प्राथमिकश्रोतसि सम्बन्धितग्रन्थानामध्ययनं विहितो विद्यते । तथा हि



शोधसुधा, वर्षः १ अङ्क : १ (२०८०) ISSN -2990-7683 (Online)

विषयसमीक्षणे यथास्थानं व्याख्याविश्लेषणविधी स्वीकृतौ स्तः । मतपर्यालोचने तुलनात्मकविधिश्चाङ्गीकृतः ।

धात्वर्थविषये सन्त्यनेके लेखाः । सर्वेषु व्याख्यानगाम्भीर्यं वैषयिकगूढता च दरीदृश्यते एव । तथापि धात्वर्थप्रसङ्गे युगपदेव शाब्दबोधोपक्रमः, कृतेः प्राधान्यं, प्रथमान्तपदमुख्यता इत्यादयो विषया अपि विव्रियन्ते । एतान् अन्यान् गौणीकृत्य मुख्यत्वेन धात्वर्थ एव निरूपणे एतल्लेखस्यौचित्यं भवेत्। अत्र हि फलव्यापारावेव धात्वर्थौ इति सप्रमाणं निश्चप्रचम् । किञ्च फलव्यापारयोर्धात्वर्थाभावे कियन्तो दोषा आपतन्तीति प्रस्तुतम् । एतावता केवलं धातुवाच्यता एव जिज्ञास्यमाणानां कृते एतदध्ययनं फलदायकं स्यात् । अपि सारल्येन परेषां मतपूर्वकं सकलशब्दमूलभूतस्य धातोः सैद्धान्तिकशब्दनयज्ञातुं सरलसोपानं भवेत् ।

प्रस्तुतालेखे धात्वर्थस्य परिचयपूर्वकं विशेषेण कौण्डभट्टमतमुपस्थाप्यते । तत्र नैयायिकमीमांसकानां मतमतान्तरं प्रदर्श्य तेषां निराकरणं, कौण्डभट्टमते नागेशस्य विचारश्च प्रदर्श्यते। एतदेव ह्यस्य सीमाङ्कनं भवेत् ।

## विषयविश्लेषणम्

### धात्वर्थविषये मतमतान्तरम्

सामान्यरूपेण धातु इत्युक्ते सति धातोर्भेदाः, प्रकारा इति ज्ञायन्ते । समेषां शब्दानां मूलभूतान् धातून् विविधरूपेण विभक्तुं शक्नुमः । गणेन, कर्मानुसारेण, प्रत्ययोत्पत्तिभेदेन च धातवो विभक्ताः सन्ति । गणपाठानुसारेण धातवः भ्वादिषु दशगणेषु सम्बद्धा विद्यन्ते । सकर्मकाकर्मकरूपेण कर्मानुसारेणापि धातवो द्विधा विभज्यन्ते, सकर्मकाकर्मकश्चेति । पुनः प्रत्ययोत्पत्तिभेदेनापि धातुस्त्रिधा विभक्तो वर्तते आत्मनेपदी, परस्मैपदी, उभयपदी चेति । परञ्चेह धातोः सैद्धान्तिकविवेचनं विधीयते । मीमांसकेषु मण्डनमिश्रो फलं धात्वर्थो व्यापारः प्रत्ययार्थ इति ब्रवीति चेत् फलमात्रं धात्वर्थौ आख्यातार्थो भावना इति प्राभाकराः । भाट्टादयस्तु फलव्यापारौ धात्वर्थौ आख्यातार्थो भावना इत्यामनन्ति । व्यापारमात्रस्य धात्वर्थत्वं प्राचीननैयायिकानामभिमतं वर्तते, यथा चोक्तं गदाधरेण “व्यापारमात्रस्य धात्वर्थत्वात्” इति । नव्यास्तु फलव्यापारयोर्धात्वर्थत्वे कृतिराख्यातार्थ इत्युद्घोषयन्ति। नैयायिकनये कृतेः प्राधान्यत्वं भवति । प्रथमान्तपदमुख्यश्शाब्दबोध एषान्मते ।

***धात्वर्थे कौण्डभट्टमतः* -** धात्वर्थविषये स्वग्रन्थे वैयाकरणभूषणसारे सिद्धान्तकारिकामुपस्थापयन् अन्यान्निराकुर्वञ्चाह कौण्डभट्टः

“फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः ।

फले प्रधानं व्यापारः तिङर्थस्तु विशेषणम् ॥

तद्धात्वर्थजन्यत्वे सति तद्धात्वर्थरूपं फलम् । व्यापारं नाम भावनाभिधा साध्यत्वेनाभिधीयमानाक्रिया । फलं च व्यापारश्च फलव्यापाराविति इतरेतरयोगद्वन्द्वः । एतौ फलव्यापारौ धात्वर्थौ भवत इति शाब्दिकनयः । आख्यातार्थश्चकर्तृकर्मसंख्याकालाः चत्वारः । “स्वतन्त्रः कर्ता” इत्यनुशासनात् स्वातन्त्र्येण विवक्षितो कर्ता भवति । कर्तुः क्रिययाऽऽप्तुमिष्टतमं कारकं कर्म इति । एते फलव्यापारयोराश्रयत्वेन वर्तेते । व्यापाराश्रयः कर्ता, फलाश्रयं कर्म इति । एकप्रत्ययजन्योपस्थितिविषयत्वात् संख्याया अन्वयः कर्तृप्रयोगे कर्तरि, कर्मप्रयोगे कर्मणि भवति । इत्थमिह “आख्यातार्थप्रकारकबोधं प्रति आख्यातजन्यकर्तृकर्मोपस्थितिर्हेतुरिति ” कार्यकारणभावो फलितः । कालस्तु धात्वर्थव्यापारे विशेषणम् । मण्डनमिश्रमते फलमात्रस्य धात्वर्थत्वे ग्रामो संयोगवान् इतिवद् ग्रामो गमनवान् इति प्रयोगापत्तिः स्यात् । धात्वर्थसंयोगरूपफलस्य ग्रामे विद्यमानत्वात् । किञ्चास्मिन् मते व्यापारस्य धात्वर्थाभावात् घटं भावयति इत्यत्र सत्तारूपफलाश्रयत्वेन यथा कर्मत्वाद् द्वितीयोत्पत्तिर्भवति तथैव घटो भवतीत्यत्रापि सत्तारूपफलाश्रयत्वेन कर्मत्वापत्तौ द्वितीया स्यात् । व्यापारस्य धात्वर्थाभावे धातूनां सकर्मकत्वाकर्मकत्वव्यवस्था अपि न स्यात् । यतो हि सकर्मकत्वं नाम स्वार्थफलव्यधिकरणव्यापारवाचकत्वं भवति । तद्भिन्नञ्चाकर्मकत्वम्, यथाचोक्तम् –

“फलव्यापारयोरेकनिष्ठतायामकर्मकः ।

धातुस्तयोर्धर्मिभेदे सकर्मक उदाहृतः ॥” (वैयाकरणभूषणसारः)

तथा ह्यस्मिन् कृञ् धातोर्व्यापाराभावे यत्नार्थकादे यतीधातोरिवाकर्मकत्वं दुर्वारं भवति । यथाचोक्तं भूषणे “यती प्रयत्ने इतिवत् फलस्थानीययत्नवाचकत्वाविशेषेणाकर्मकतापत्ति- रुक्तरीत्यादुर्वारा” इति । विवरणाच्च धातोर्व्यापारवाचकत्वसिद्धेः नेह मण्डनमिश्रमतम् उचितम् । पचति इत्यस्य विवरणं पाकमुत्पादयति इति भवति । पाकानुकूला भावना तादृश्युत्पादना चेतिभावः । विवरणविव्रियमाणयोः समानार्थकत्वाद् धातोरपिभावना- वाचकत्वम् आवश्यकम् । एतैरेव युक्तिभिः प्राभाकरमतमपि निरस्तम् । गुरुभाट्टानुसारिभिः मीमांसकैः आख्यातार्थो भावनेति यदुच्यते तदपिमतं समीचीनं न घटते शाब्दिकनये दोषयुक्तक्त्वात् । यतोहि कार्यं, पचनीयम् इत्यादौ कृदन्तस्थलेऽपि ण्यत्, अनीयरप्रत्यये कर्मकारकस्यैव विधानाद् भावना धातुवाच्यैव सिद्ध्यति । अन्यथा विना क्रियां कारकत्वासंभवेन

तद्वाचकप्रत्ययस्यापि असम्भवात् । किञ्च धातोः कियावाचकतामुद्दिश्य कियमाणा धातुसंज्ञा च न स्यादिति न ह्येतेषामपिमतं निर्दुष्टम् ।

प्राचीननैयायिकमते व्यापारमात्रस्य धात्वर्थेऽप्यनेके दोषाः समापतन्तीति न तेषाञ्चमतं समीचीनम् । तत्र धातोः फलवाचित्वाभावात् धातोः सकर्मकत्वाकर्मकत्व व्यवस्थोच्छिन्ना स्यात् । किञ्च क्रियते घटः स्वयमेव इति प्रयोगश्च दुर्लभः स्यात् । फलस्य धात्वर्थत्वाभावे कृञ् धातोः यत्नमात्रार्थकत्वे यतीधातोरिव फलस्थानीय- यत्नवाचकत्वेनाकर्मकत्वात् कर्मवद्भावाप्राप्तौ उक्तप्रयोगो न स्यात् । अत उत्पत्तिरूपफलानुकूलव्यापार एव कृञ् धात्वर्थः स्वीकरणीयः । इतोऽपि महान् दोषस्तु त्यजिगम्योः पर्यायतापत्तिरिति । विभागानुकूलव्यापारः त्यजिधात्वर्थो भवति चेत् संयोगानुकूलव्यापारो गम्धात्वर्थः । इतथमिह फलस्यैव वैलक्षण्यं विद्यते । फलस्य धात्वर्थाभावे तु व्यापारसामान्येन द्वयोः समानार्थकतापत्तिः स्यात् । कौण्डभट्टश्चावादीत् “धातूनां फलवाचकत्वे त्यजिगम्योः पर्यायतापत्तिः क्रियावाचकत्वाऽविशेषात्” इति । तथा च धात्वर्थत्वेन विक्लित्तिरूपफलावाचकत्वे द्व्यर्थः पचिरितिभाष्याभिमतं च दूष्येत । विक्लेदनानिवर्तना च पचेरर्थः । तण्डुलान् विक्लेदयन्नोदनं निर्वर्तयतीत्यर्थः । नव्यास्तु फलव्यापारौ धात्वर्थत्वेनोररीकुर्वन्ति परं कृतिरेव आख्यातार्थस्तेषामपि । तेषां मते न त्वाख्यातार्थः कर्ता प्रथमान्तपदादेव तल्लाभात्, अनन्यलभ्यस्यैव शब्दार्थत्वात् । तन्नये कृतौ शक्तिस्वीकारे लाघवमपि विद्यते । लाघवन्तु शक्यतावच्छेदकदृष्ट्या इति । कर्तरि शक्तिः स्वीक्रियते चेत् कर्तृत्वं कृत्याश्रयत्वमेव भवति । तच्च कृतिरूपं “प्रकृतिजन्यबोधे प्रकारीभूतोऽर्थः भावप्रत्ययार्थः” इतिनियमात् । एवञ्च कृतिराश्रयभेदादनेका भवतीति शक्यतावच्छेदकत्वे गौरवं, शक्यतावच्छेदकभेदात् शक्तिनानात्वप्रसङ्गाच्चेति । परं नेदं नैयायिकमतं स्वीकारार्हं तेन “रथो गच्छति” इत्यादौ बोधो न स्यात् । यतः कृतेश्चेतनमात्रवृत्तित्वं भवतीति रथस्याचेतनत्वात्, कृत्याश्रयत्वस्य रथेऽपि विद्यमानत्वात्।

किञ्चाख्यातस्य कृतिवाचकत्वे पुरुषव्यवस्था च न स्यात् । तिङ्समानाधिकरणे युष्मदिमध्यमपुरुषः, तिङ्समानाधिकरणेऽस्मदि चोत्तमपुरुषो भवति । तत्र समानाधिकरण्यं स्ववाच्यवाचकत्वसम्बन्धेन भवति । यथाचोक्तं “भिन्नप्रवृत्तिनिमित्तकानां शब्दानामेकस्मिन्नर्थे वृत्तिः समानाधिकरण्यम् इति ।” एवञ्चाख्यातस्य कृतिवाचकत्वे तस्य युष्मच्छब्देनोक्तसमानाधिकरण्या सम्भवात् पुरुषव्यवस्थोच्छिन्ना स्यात् । नोगेशोऽपिप्राह “युष्मदस्मदोः लकारेण समानाधिकरण्याभावात् पुरुषव्यवस्थाऽनापत्तेः” इति । आख्यातार्थत्वेन कृते वाचकत्वे लाघवं, कर्तृवाचकत्वे गौरवमित्यपि



शोधसुधा, वर्ष : १ अङ्क : १ (२०८०) ISSN -2990-7683 (Online)

नादरणीयम् । न च कर्तृत्वं कृत्याश्रयत्वं भवितुमर्हति । सर्वत्राचेतनादौ तस्यासम्भवात् । यथाचोक्तं कौण्डभट्टेन “कारकचक्रप्रयोक्तृत्वं कृत्याश्रयत्वं वा दण्डः करोति इत्यत्राव्याप्तम्” इति । तस्मात् कर्तृत्वं नाम अखण्डोपाधिरूपमेकमेवेति न च शक्यतावच्छेदकत्वेऽपि गौरवम् । इत्थमिह आख्यातार्थः कृतिरिति नैयायिकानां मतमपि न समीचीनम् ।

**धात्वर्थे नागेशमतः** - नागेशमतम् इत्युच्यमाने व्याकरणे नव्यनयो ज्ञायते । धात्वर्थविषयेऽन्येषां मतखण्डने च प्रायः प्राचीनानां पक्षपोषणमेव विदधाति नागेशः । फलव्यापारावेव धात्वर्थौ, कर्तृकर्मसंख्याकालाश्चत्वार आख्यातार्थ इतीह नागेशसम्मति । फलव्यापारयोर्धातोः किदृशी शक्तिः, शाब्दबोधे कस्य प्राधान्यमिति विषये प्राचीनैः मतभेदो नागेशस्य । फलनिरूपिता व्यापारनिरूपिता च धातोः पृथक् शक्ति उत एकवृन्तगतफलद्वयन्यायेन पृथगुपस्थितिप्रयोजिका खण्डश एकैव शक्तिरिति प्राचीनाभिमतम् । नागेशमते तु फलविशिष्टे व्यापारे, व्यापारविशिष्टे फले शक्तिरिति । अयं हि नागेशमतं विशिष्टशक्तिवाद इति नाम्ना प्रथितो विद्यते । तत्र फलस्य व्यापारे वैशिट्यमनुकूलत्वसम्बन्धेन, जन्यत्वेन च व्यापारस्य फले बोध्यं स्यात् । स्वाभिमतं पोषयन् नागेशः कौण्डादीनां मते दोषान् उपस्थापयति । उद्देश्यविधेयभावेनान्वयापत्तिः, कार्यकारणभावद्वयकल्पनम्, अर्थद्वयेशक्ति- द्वयकल्पनम्, बोधजनकत्वसम्बन्धद्वयकल्पनमिति । शाब्दबोधेऽपि नागेशविचारः कश्चिद् भिन्नः । प्राचिनाः कर्तरि कर्मणि द्वयोरेव व्यापारमुख्यश्शाब्दबोधमङ्गीकुर्वन्ति चेत् कर्तृप्रत्यस्थले व्यापारमुख्यविशेष्यकः, कर्मप्रत्यस्थले फलमुख्यविशेष्यकः शाब्दबोधो नागेशमतम् । उक्तञ्च “ तस्मात् फलावच्छिन्ने व्यापारे, व्यापारावच्छिन्ने फले च धातूनां शक्तिः, कर्तृकर्मार्थकतत्तत्प्रत्ययसमभिव्याहारश्च तत्तद्बोधे नियामक इत्याहुः” इति ।

**निष्कर्षः**

अस्मिन् शोधालेखे धात्वर्थवाच्येऽन्येषां मतं निराकृत्य शब्दशास्त्रमार्गः प्रदर्शितः । स्वाभिमतपुष्ट्यर्थं भट्टोजीदीक्षितस्य ‘‘वैयाकरणसिद्धान्तकारिका’’ इति ग्रन्थस्य श्लोकः प्रतिज्ञारूपेणोपस्थापितः ।

“फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः ।
फले प्रधानं व्यापारः तिङर्थस्तु विशेषणम् ॥” (वैयाकरणभूषणसारः)

फलव्यापारौ धातुवाच्यावेव नान्यथा । कर्तृकर्मसंख्याकालाश्चत्वारः तिङर्थाः । एकवृन्तगतफलद्वयन्यायेन पृथगुपस्थितिप्रयोजिका खण्डशः एकैव शक्तिः फलव्यापारयोः भवति इति

कौण्डभट्टादीनां मतम् । एतेषां मते कर्तरि कर्मण्येव व्यापारमुख्यश्शाब्दबोधो भवति । नागेशमते तु प्रयोगानुरुपं वैशिट्यमिह द्वयोः, कर्तृप्रयोगे व्यापारस्य मुख्यता, कर्मणि फलस्येति । किञ्च फलविशिष्टे व्यापारे, व्यापारविशिष्टे फले शक्तिः धातोः, कर्तृप्रत्यस्थले व्यापारमुख्यविशेष्यकः, कर्मप्रत्यस्थले फलमुख्यविशेष्यकः शाब्दबोधो भवति इति ।

## सन्दर्भसामग्रीसूची


द्विवेदी, ब्रह्मदत्तः (ई. १९८५) *वैयाकरणभूषणसारः,* चौखम्भा ओरियन्टला ।

भट्टः, नागेशः (ई. १९६१) *परमलघुमञ्जूषा,* महाराज सन्यासी राव विश्वविद्यालयः ।

भर्तृहरिः (ई.२०१६) *वाक्यपदीयम्,* संपूर्णानन्दसंस्कृतविश्वविद्यालयः ।

मिश्रः, प्रभाकरः (वि.सं २०२९) *वैयाकरणभूषणसारः,* रामानुज संस्कृत महाविद्यालयः ।

मिश्रः, राममनोहरः (वि.सं २०४०) *भूषणसारपरमलघुमञ्जुषयोः सिद्धान्तानां समीक्षा,* सरस्वतीभवन अध्ययनमाला ।